# Devaih Krita Ekalingashivastutih

# देवैः कृता एकलिङ्गशिवस्तुतिः

## Document Information

Text title : EkalingashivastutiH Devaih Krita

File name : ekalingashivastutiHdevaiHkRRitA.itx

Category : shiva, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : vAyupurANa. ekaliNgamAhAtmyam . aShTamo.adhyAyaH - kAmadhenuvaradAnam . 8.23-38 ..

Latest update : October 14, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 19, 2025

*sanskritdocuments.org*

# देवैः कृता एकलिङ्गशिवस्तुतिः

(एकलिङ्गमाहात्म्ये)

देवा ऊचुः -
लोकानां त्वं सृष्टिकर्ता महेशः
पाताऽमीषां भुवनानां हिताय ।
सर्वस्यादिस्त्वं न कोऽपि त्वदादि-
रीशो नेशस्त्वदृतेऽन्योऽस्ति भूयः ॥ २३॥

स्थूलः सूक्ष्मो व्यक्तव्यक्तेतरश्च
दीर्घत्वेऽपि त्वं गुरुत्वे वृत्तोऽसि ।
त्वं वै वन्द्यो नो तवैवास्ति वन्द्य
आराध्यस्त्वं न त्वदाराधनीयः ॥ २४॥

धाता विश्वस्यापि धाता न तेऽस्ति
पाता लोकस्यापि पाता न तेऽभूत् ।
संहर्ता त्वं संहरेत्त्वां न कश्चित्
सर्वज्ञस्त्वं सर्वदा सर्वगोऽसि ॥ २५॥

विद्यां वेत्थ त्वां न विद्या विदन्ति
दाता त्वं वै नैव दाता तवास्ति ।
स्तुत्यो लोके स्तुत्य एवास्ति नो ते
पूज्यो लोके नैव पूज्यस्तवास्ति ॥ २६॥

त्वं वै ब्रह्मा विष्णुरूपोऽमरेन्द्र-
स्त्वं वै सूर्यस्त्वं च सोमो नभस्वान् ।
पृथ्वी व्योम ह्यग्निरूपः प्रचेता
भूतात्मा त्वं विश्वरूपस्त्वमेव ॥ २७॥

एतन्मुक्त्वा पावनं नैव कश्चिद्-

भोज्यं भोक्ता ज्ञानवान् ज्ञानमग्र्यम् ।
शास्ता शास्यं सृष्टिकर्ता च सृज्यं
हव्यं होता यज्ञयाज्यस्त्वमाहुः ॥ २८॥

एतधीनं विद्यते नैव किञ्चिद्-
हीनस्त्वं वा केनचिन्नैव शम्भो ।
विद्यापूर्णस्तद्गुणस्तानपूर्णं (गुणैः स्तादपूर्णः)
सर्वं पश्ये(स्)त्वां न पश्यन्ति केचित् ॥ २९॥

विश्वं तेऽन्तस्त्वं न तस्यान्तरीश
तस्यादिस्त्वं नैव किञ्चित्तवादिः ।
आधारस्त्वं न त्वदाधारतास्ति
विश्वं रूपं नैव रूपं तवास्ति ॥ ३०॥

एको रुद्रो न द्वितीयस्तथाऽऽहुः
पाताले वा चान्तरिक्षे च नाके ।
वृक्षे तोये खे तडित्तोयदेषु
कूपे वाथो सागरे ह्रत्सरित्सु ॥ ३१॥

देशे देशे लिङ्गरूपेण सर्वं
गुहापाथः पर्वतेष्वाटवीषु ।
क्षेत्रे सस्ये सर्ववस्तुस्वरूपं
विश्वं धत्से सर्वमूर्ते नमस्ते ॥ ३२॥

सर्गादौ ये कर्मकारादयोऽपि
शिल्पा ये त्वां नित्ययुक्ता यजन्ते ।
आसङ्घेयैरात्मभिश्चैव सृष्टा
यज्या(याः) पुत्रा औरसा विश्वमूर्ते ॥ ३३॥

तथा विप्रान् क्षत्रियान् वैश्यशूद्रान्
अन्यान् स्वे स्वे कर्मणि त्वं नियु(यो)ज्य ।
राज्ञो नीत्या पालने यत्प्रजानां
चातुर्वर्ण्यं वेदमार्गे निवेश्य ॥ ३४॥

ये ये भक्त्या त्वामुपासन्त ईश
नेशं पापा मन्यमानाः कुतर्कैः ।
ते ते स्वैः स्वैः कर्मभिः पुण्यपापै-

र्लिप्यन्ते वै नाभवत्तेष्वभेदः ॥ ३५॥

त्वं वै ज्येष्ठो नैव ज्येष्ठास्तु ते ते
वाचामीशस्त्वं न ते वाच ईशाः ।
काव्ये काव्ये त्वं कविर्नैव चान्यः
कस्ते विन्द्यादेवमन्यो(न्त्वं) महिम्नः ॥ ३६॥

दुष्टान् सर्वान् संहराश्वेकलिङ्ग
पुष्पैर्बाणैः पञ्चकैराशु शम्भो ।
म्लेच्छान् पापान् धर्ममार्गस्य शत्रून्
बद्धा शीघ्रं नागपाशेन दूरे ॥ ३७॥

क्षिप्त्वा सर्वा देवताः सौम्यरूप
त्राहि प्रीत्या सेवकान् विश्वमूर्ते ।
संसाराब्धौ पातितं विश्वमीक्ष्य
धृत्वा हस्ते चाङ्कुशं तेन पाहि ॥ ३८॥

इति एकलिङ्गमाहात्म्ये देवैः कृता एकलिङ्गशिवस्तुतिः सम्पूर्णा ।

- ॥ एकलिङ्गमाहात्म्यम् । अष्टमोऽध्यायः - कामधेनुवरदानम् । ८.२३-३८॥

- .. ekali NgamAhAtmyam . aShTamo.adhyAyaH - kAmadhenuvaradAnam . 8.23-38 ..

Notes:

Devāḥ देवाः eulogize Śiva शिव following the establishment of the Ekaliṅga एकलिङ्ग.

EkaliṅgaMāhātmyam एकलिङ्गमाहात्म्यम्, that constitutes a SthalaPurāṇa स्थलपुराण and SthalaMāhātmyam स्थलमाहात्म्यम्, has been composed in two styles - Paurāṇika पौराणिक and Kāvyamaya काव्यमय. It includes the descriptions about the manifestation of the Ekaliṅga Śiva Kṣetra एकलिङ्ग शिव क्षेत्र in relation to the story of the duo - Baṣpa Rājā बाष्प राजा - Hārīta Muni हारीत मुनि, and the lineage of kings of Citrakūṭa चित्रकूट (now k.a. Cittauṛagaṛha चित्तौड़गढ़ ) and Medapāṭa मेदपाट (now k.a. Mevāṛa मेवाड़ ) including Mahārāṇā Kumbhā महाराणा कुम्भा.

Baṣpa Rājā बाष्प राजा is now popularly known as Bappā Rāvala बप्पा रावल.

The VāyuPurāṇam वायुपुराणम् has been attributed to be the source composition of EkaliṅgaMāhātmyam एकलिङ्गमाहात्म्यम् as the main narrator of the same is Vāyu वायु.

EkaliṅgaMāhātmyam - Paurāṇika एकलिङ्गमाहात्म्यम् - पौराणिक is composed in 32 chapters that, with a brief summary of each chapter; and the EkaliṅgaMāhātmyam - Kāvyamayam एकलिङ्गमाहात्म्यम् - काव्यमयम् can be accessed from the respective links given below.

EkaliṅgaMāhātmyam - Kāvyamayam एकलिङ्गमाहात्म्यम् - काव्यमयम् includes description of the lineage of Baṣpa Rājā बाष्प राजा, Stuti स्तुति of the erudite Mahārāṇā Kumbhā महाराणा कुम्भा i.e. Kumbhakaraṇa कुम्भकरण, and the Pañcāyatana Stuti पञ्चायतन स्तुति. The latter comprises of Stuti-s of Ganeśa गणेश, Sūrya सूर्य, Nārāyaṇa नारायण, Śiva शिव, Caṇḍikā चण्डिका and Ekaliṅga Śiva एकलिङ्ग शिव.

It is noteworthy that the Pañcāyatana Stuti पञ्चायतन स्तुति has some names associated with Kumbhā कुम्भा such that he is remembered with each of the Deity worshipped with this stuti. Towards conclusion, there is EkaliṅgaNamaskāra एकलिङ्गनमस्कार.

Encoded and proofread by Ruma Dewan

---

*Devaih Krita Ekalingashivastutih*

pdf was typeset on October 19, 2025

Please send corrections to *sanskrit@cheerful.com*